सेट्।) रेफोपधः। ङ, वर्हते। इति दुर्गादासः॥

बल, क ङ निरूपणे। इति कविकल्पद्रुमः॥ (चुरा०-आत्म०-सक०-सेट्।) क ङ, बालयते धर्म्मं धीरः। अयं कैश्चिन्न मन्यते। इति दुर्गादासः॥

बल, क म जीवने। इति कविकल्पद्रुमः॥ (चुरा०-पर०-अक०-सेट्।) बलयति। इति दुर्गादासः॥

बल, ङ दाने। वधे। निरूपणे। इति कविकल्पद्रुमः॥ (भ्वा०-आत्म०-सक०-सेट्।) ङ, बलते। इति दुर्गादासः॥

बल, ज धान्यावरोधे। जीवने। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-सक०-अक०च-सेट्।) बालः बलः। धनस्य भावो धान्यं समृद्धिस्तस्य अवरोधः प्रतिबन्धः धान्यावरोधः। बलति पुण्यहीनं विधिः। पुण्यहीनस्य समृद्धिं प्रतिबध्नाति इत्यर्थः। अयमर्थो अन्यैर्न मन्यते। बलत्यन्नेन लोकः। इति दुर्गादासः॥

ब(व)लं, क्ली, (बलते विपक्षान् हन्तीति। बल + पचाद्यच्।) सैन्यम्। (यथा, भगवद्गीतायाम्।१।१०।
"अपर्य्याप्तं तदस्माकं बलं भीष्माभिरक्षितम्।
पर्य्याप्तन्त्विदमेतेषां बलं भीमाभिरक्षितम्॥")
स्थौल्यम्। सामर्थ्यम्। अस्य शेषस्य पर्य्यायः। द्रविणम् २ तरः ३ सहः ४ शौर्य्यम् ५ स्थाम ६ शुष्मम् ७ शक्तिः ८ पराक्रमः ९ प्राणः १०। इत्यमरः।२।८।१०२॥ महः ११ शुष्म १२। इति शब्दरत्नावली॥ ऊर्ज्जः १३। इति जटाधरः॥ तद्वैदिकपर्य्यायः। ओजः१ पा(वा)जः२ शवः३ तरः ४ तवः ५ त्वक्षः ६ शर्द्धः ७ बाधः ८ नृम्णम् ९ तविषी १० शुष्मम् ११ शुष्णम् १२ शूषम् १३ दक्षः १४ वीळु: १५ च्यौत्नम् १६ सहः १७ यहः १८ वधः १९ वर्गः २० वृजनम्२१ वृक् २२ मज्मना २३ पौंस्यानि २४ धर्णसिः २५ द्रविणम् २६ स्यन्द्रासः २७ शम्बरम् २८। इत्यष्टाविंशतिर्ब्बलनामानि। इति वेदनिघण्टौ। २। ९॥ (यथा, मनुः। २। ५५।
"पूजितं ह्यशनं नित्यं बलमूर्ज्जञ्च यच्छति॥")
तत्तु गर्भस्थबालकस्य षष्ठे मासि भवति। इति सुखबोधः॥ गन्धरसः। रूपम्। इति मेदिनी। ले, ३७॥ शुक्रम्। इति हेमचन्द्रः।३।२९३॥ (यथाह सुश्रुतः। "धातूनां यत्परं तेजस्तत् खल्वोजस्तदेव बलमित्युच्यते॥") वपुः। इति जटाधरः॥ (यथा, रामायणे। ७। १। ३३।
"कीदृशो वै प्रभावोऽस्य किं बलं कः पराक्रमः॥")
पल्लवम्। इति शब्दरत्नावली॥ रक्तः। इति शब्दचन्द्रिका॥ (बलमस्यास्तीति। बल + अर्श आद्यच्।) बलयुक्ते, त्रि। इति मेदिनी॥ *॥ सद्योबलकराणि बलहराणि च यथा,—
"सद्योबलकराण्णीणि बालाभ्यङ्गं सुभोजनम्।
सद्योबलहराण्णीणि अध्वानं मैथुनं ज्वरः॥"
बलकारकौषधं यथा, गारुड़े।११५।१६६ अः।
"शिवामलकचूर्णं वै मधुना उदकेन वा।
बलानि कुर्य्यान्नासाया प्रत्युषे भक्षणं शिव!॥"
पारिभाषिकबलानि। यथा,—
"विद्याभिजनमित्राणि वृद्धिसत्त्वधनानि च।
तपःसहायवीर्य्याणि दैवञ्च दशमं बलम्॥"
इति महाभारते आपद्धर्म्मः॥

अपि च।
"अबलस्य बलं राजा बालस्य रुदितं बलम्।
बलं मूर्खस्य मौनन्तु तस्करस्यानृतं बलम्॥" *॥

अपि च।
"क्षत्त्रियाणां बलं युद्धं व्यापारश्च बलं विशाम्।
भिक्षा बलं भिक्षुकाणां शूद्राणां विप्रसेवनम्॥
हरौ भक्तिर्हरेर्दास्यं वैष्णवानां बलं हरिः।
हिंसा बलं खलानाञ्च तपस्या च तपस्विनाम्॥
बलं वेशश्च वेश्यानां योषितां यौवनं बलम्।
बलं प्रतापो भूपानां बालानां रुदितं बलम्॥
सतां सत्यं बलं मिथ्या बलमेवासतां सदा।
अनुगानामनुगमः स्वल्पस्थानाञ्च सञ्चयः॥
विद्या बलं पण्डितानां वाणिज्यं बणिजां बलम्।
शश्वत्सुकर्म्मशीलानां गाम्भीर्य्यं साहसं बलम्॥
धनं बलञ्च धनिनां शुचीनाञ्च विशेषतः।
बलं विवेकः शान्तानां गुणिनां बलमेकता॥
गुणो बलञ्च गुणिनां चौराणाञ्चौर्य्यमेव च।
विप्रवाक्यञ्च कापट्यमधर्म्मष्ठाणिनां बलम्॥
हिंसा च हिंस्रजन्तूनां सतीनां पतिसेवनम्।
वरशापौ सुराणाञ्च शिष्याणां गुरुसेवनम्॥
बलं धर्म्मो गृहस्थानां भृत्यानां राजसेवनम्।
बलं स्तवः स्तावकानां ब्रह्म च ब्रह्मचारिणाम्॥
यतीनाञ्च सदाचारो न्यासः सन्न्यासिनां बलम्।
पापं बलं पातकिनां सुभक्तानां हरिर्बलम्॥
पुण्यं बलं पुण्यवतां प्रजानां नृपतिर्बलम्।
फलं बलञ्च वृक्षाणां जलधीनां जलं बलम्॥
जलं बलञ्च शस्यानां मत्स्यानाञ्च जलं बलम्।
शान्तिर्बलञ्च भूपानां विप्राणाञ्च विशेषतः॥"
इति ब्रह्मवैवर्त्ते गणेशखण्डे ३५ अध्यायः॥

ब(व)लः, पुं, (बलति निरूपयति स्वेष्टमिति। बल + अच्। बलदेवपक्षे नामैकदेशग्रहणाच्चापि सिध्यति भीमादिवत्।) काकः। (यथा, महाभारते। ७। ६। २५।
"गृध्राः श्येना बलाः कङ्का वायसाश्च सहस्रशः॥")
बलदेवः। इत्यमरः॥ (यथा, भागवते।४।५।१९।
"पूष्णो ह्यपातयत् दन्तान् कलिङ्गस्य यथा बलः॥")
अस्य पत्न्यादीनां नामानि यथा,—
"रेवतीं नाम तनयां रेवतस्य महीपतेः।
उपयेमे बलस्तस्यां जज्ञाते निशठोल्मुकौ॥"
इति विष्णुपुराणे। ५। २५। १९॥
वरुणवृक्षः। इति शब्दचन्द्रिका॥ (वायुना प्रदत्तः कार्त्तिकेयानुचरभेदः। यथा, महाभारते। ९। ४५। ४२।
"बलञ्चातिबलञ्चैव महावक्त्रौ महाबलौ।
प्रददौ कार्त्तिकेयाय वायुर्भरतसत्तम!॥"
रामपुत्त्रस्य कुशस्यान्वये जातस्य पारियात्रस्य पुत्त्रविशेषः। यथा, भागवते। ९। १२। २।
"देवानीकस्ततोऽनीहः पारियात्रोऽथ तत्सुतः।
ततो बलः स्थलस्तस्माद्वज्रनाभोऽर्कसम्भवः॥"
दनायुषः पुत्त्रविशेषः। यथा, महाभारते। १। ६५। ३३।
"दनायुषः पुनः पुत्त्राश्चत्वारोऽसुरपुङ्गवाः।
विक्षरो बलवीरौ च वृत्रश्चैव महासुरः॥"
मेघः। इति निघण्टुः। १। १०॥) दैत्यविशेषः। इति मेदिनी। ले, ३७॥ तस्य विवरणं यथा,—
"आसीद्दैत्यो बलो नाम महाबलपराक्रमः।
देवगन्धर्व्वयक्षाणां चन्द्रेन्द्रभयकारकः॥
येन विष्णुर्यमः सूर्य्यो भग्न आजौ प्रपीड़िताः।
अनिलानलरक्षश्च वरुणश्च वशीकृताः॥
संयम्य येन नागेन्द्रा महाभोगा महाविषाः।
गरुड़श्च कृतो भृत्यः सदाज्ञामभिवर्त्तिनः॥
येन संलिख्य शैलेन्द्रः कन्दुकाकारकारितः।
क्रीड़ार्थं येन विप्रेन्द्र! गिरयः प्रथिता भुवि॥
तेन देवाः सब्रह्माद्या दिवः सर्व्वे पलायिताः।
दत्तं स्थानन्तु पातालं समयं शरदां शतम्॥
तथा ते भयमापन्ना मानं त्यक्ता गता गुरुम्।
पृच्छन्ति विनयात् सर्व्वे शक्रस्य हितकारिणः॥
केनोपायेन देवानां स्वर्गवासो भवेद्द्विज!।
भवान् हि नयवेत्ता च उपायं वद पृच्छताम्॥
त्वमेव शास्त्रवेत्ता च हितः शक्रस्य नित्यशः।
शक्रोदधिनिमग्नानामतिपोतो भव द्विज!॥
एवं पृष्टः स देवैस्तु गुरुर्व्वचनमब्रवीत्॥
बृहस्पतिरुवाच।
यदयं दानवः शक्र! न युद्धे भवतो वशः।
रणे न क्षयमायाति अजेयः सङ्गरे यतः॥
अतः कपटमास्थाय प्रार्थनीयः क्रतुं प्रति।
दाता सत्त्वबलोपेतः स्वकायमर्थितेष्वपि॥
अतस्तस्य प्रार्थयिता विष्णुर्म्मायामहोदधिः।
द्विजरूपधरो भूत्वा याचनाय वधाय च॥
गुरुणा चोदिता देवाः स्तुतास्ते निधनम्प्रति।
गताः सर्व्वे ततः शान्ता यत्र देवो जनार्द्दनः॥
माधवेन तदा देवा दृष्टा भयसमाकुलाः।
क्रमार्थ्यासनसंलापैः सर्व्वे ते संस्तुतां भृशम्॥
संपृच्छितास्तदा सर्व्वे किमायातावदन् सुराः॥
देवा ऊचुः।
बलेन बलिना देव! सर्व्वे विचालिता वयम्।
मायावी त्वं वधे तस्य नान्योपायो भवेत् क्वचित्॥
विष्णुरुवाच।
करोमि भवतामिष्टं किन्त्वसौ बलसंयुतः।
सात्त्विको नयवेत्ता च सर्व्वशास्त्रार्थपारगः॥
गूढ़मन्त्रविचारी स्याद्धर्म्मैकक्रतनिश्चयः।
तस्य मायां कथं कर्त्तुं शक्यते सुरसत्तमाः॥
पुरैका भवते विद्या मम दत्ता तु शूलिना।
मोहिनी नाम विख्याता मोहं या कुरुते भृशम्॥
ततोऽहं तस्य नाशाय स्मरामि परमेश्वरीम्।
स्मरित्वा परमां विद्यां द्विजभावो जनार्द्दनः॥